## संस्कृत वार्ता:

## दिनाङ्क : 05.06.2026

## सायम् - 06:20

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातराज्ये अष्टादश-सहस्राष्टशत-कोटिरूप्यकाधिक-मूल्यानां मार्ग-विद्युत: तथा औद्योगिक-विकास-परियोजनानां शुभारम्भं कृतवान्।

- केन्द्रसर्वकारेण विदेशी-संस्थागत-निवेशकेभ्यः करेषु महत् शैथिल्यम् प्रदत्तम् ।

- भारतीय-रिजर्व-बैङ्केन स्वस्य नवीन-मौद्रिक-नीतिसमीक्षायां प्रमुखकुसीददराः यथावत् स्थापिताः। पुन: क्रयण दरः पञ्च दशमलव द्वि - पञ्च प्रतिशतं यावत्  स्थास्यति।

- नेपालदेशस्य विदेशमन्त्री शिशिरखनालः अद्य आरभ्य त्रिदिवसीयां भारतयात्रायां दिल्लीं सम्प्राप्नोत् ।

- अद्य विश्वपर्यावरणदिवसः समग्रे विश्वे मन्यते । प्रशासनेन दिल्ल्यां अष्टादश नमो आक्सीजन पार्क इति उद्यानानि उद्घाटितानि ।

- **अपि च,**

- पुरुषाणाम् आ-अष्टादश एशिया-कप् हॉकी-प्रतियोगितायाः  उपान्त्यस्पर्धायां भारतेन-पाकिस्तान दलम् पञ्च त्रि अंक अंतरालेन पराजितम्।

**अथ वार्ता: विस्तरेण**

**अद्य गुजरात-दमनयोः**

विकासपरियोजनानां शुभारम्भं कृतवान् प्रधानमन्त्री मोदी। भारतस्य प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातराज्यस्य सूरतनगरे अष्टादश-सहस्राष्टशत –कोटिरूप्यकाधिक-मूल्यानां मार्ग-विद्युत: तथा औद्योगिक-विकास-परियोजनानां शुभारम्भं कृतवान्। सः आदौ हजीराक्षेत्रं गत्वा औद्योगिकाधारभूत-संरचना-कार्याणां समीक्षां कृतवान् तथा जनसभामपि सम्बोधितवान्। अनन्तरं प्रधानमन्त्री दमननगरं गच्छति, यत्र प्रायः द्विसहस्र-नवशत-सप्ततिकोटि-रूप्यक-परिमितानां विविध-विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च करोति। एताभिः परियोजनाभिः क्षेत्रस्य विकासः, आजीविका-निर्माणानि तथा जनसुविधानां वृद्धयः च भविष्यन्ति ।

## विदेशी-निवेशकेभ्यः करमुक्तिः

विदेशी-निवेशकेभ्यः करमुक्तिः, भारते च निवेशवृद्धेः प्रोत्साहनम्। केन्द्रसर्वकारेण विदेशी-संस्थागत-निवेशकेभ्यः महत् शैथिल्यम् प्रदत्तम् । सर्वकारीय - प्रतिभूतिषु निवेशात् प्राप्ते: पूंजीलाभे तथा कुसीदरूपेणआये सम्पूर्णकरमुक्तिः प्रदत्ता। एषा व्यवस्था अस्य वर्षस्य एप्रिल-मासस्य प्रथमदिनात् प्रभाविनी भविष्यति। एतदर्थं प्रशासनेन षड्विंशत्युत्तर द्विसहस्रतमवर्षस्य आयकर-संशोधनाध्यादेशः प्रकाशितः। सर्वकारस्य मते, अनेन निर्णयेन विदेशी-निवेशकेभ्यः भारते अधिकनिवेशस्य प्रोत्साहनं भविष्यति। तेन सर्वकारीयप्रतिभूतिषु निवेशः वर्धिष्यते। अर्थव्यवस्थायाः सुदृढीकरणे तथा विकासपरियोजनानां वित्तसङ्ग्रहे च साहाय्यं भविष्यति।

## भारतीय-रिजर्व-बैङ्केन कुसीददरा: यथावत् स्थापिताः

भारतीय-रिजर्व-बैङ्केन स्वस्य नवीन-मौद्रिक-नीतिसमीक्षायां प्रमुखकुसीददराः यथावत् स्थापिताः। बैङ्कस्य गवर्नरः संजयमल्होत्रा अवदत् यत् रेपो-दरः पञ्च दशमलव द्वि - पञ्च प्रतिशतं यावत् एव स्थास्यति। बैङ्कानां कृते रिजर्व-बैङ्कात् ऋणग्रहणदरे कश्चन् परिवर्तनम् न कृतम् । तथापि, रिजर्व-बैङ्केन चालित-वित्तवर्षस्य आर्थिकवृद्ध्यनुमानं षड् दशमलव नव प्रतिशतात् न्यूनीकृत्य षड् दशमलव षड् प्रतिशतं कृतम्। अपरञ्च मुद्रास्फीत्याः अनुमानं वर्धापयित्वा पञ्च दशमलव एक प्रतिशतं निर्धारितम्। परिवर्तमानानाम् आर्थिकपरिस्थितीनां दृष्ट्या एषः निर्णयः समुचितः इति बैङ्केन उक्तम्।

## नेपाल- विदेशमन्त्री भारतयात्रा

नेपालदेशस्य विदेशमन्त्री शिशिरखनालः अद्य आरभ्य त्रिदिवसीयस्यां भारतयात्रायां दिल्लीं सम्प्राप्नोत् । सः भारतस्य विदेशमन्त्रिणः डॉ. एस्. जयशङ्करस्य निमन्त्रणेन भारतम् आगच्छति। यात्राकाले नवदिल्लीत्यत्र उभयोः मन्त्रिणोः मध्ये द्विपक्षीया वार्ता भविष्यति। नेपालस्य विदेशमन्त्रालयस्य अनुसारं व्यापारः, निवेशः, सम्पर्कविस्तारः, ऊर्जाक्षेत्रे सहयोगः तथा जनसम्बन्ध-सुदृढीकरणम् चेत्यादिषु विषयेषु चर्चा भविष्यति। एषा यात्रा भारत-नेपालयोः मैत्रीपूर्ण-सम्बन्धान् तथा परस्परसहयोगं अधिकं सुदृढं करिष्यतीति ।

## विराम

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**केन्द्रीयगृहमन्त्री- सीमा-सुरक्षाबलस्य**

केन्द्रीयगृहमन्त्री अमित शाहः अद्य त्रिपुराराज्यस्य लङ्कामुरा-सीम्नि सीम-सुरक्षाबलस्य सैन्यबलम् सम्बोधयन् व्यापिकां सीम-सुरक्षां प्रति दृष्टिकोणं प्रस्तुतवान्। सीमसुरक्षायाः महत्त्वं प्रतिपादयन् गृहमन्त्री उक्तवान् यत् प्रशासनं त्रिपुरा, पश्चिमबङ्ग बिहार चेत्येतेषु सीमवर्तिषु क्षेत्रेषु अवैध जनसांख्यिकीय परिवर्तनानां निरोधाय दृढसंकल्पितम् अस्ति। श्रीशाहः सीम-प्रबन्धनस्य सुदृढीकरणाय स्थानीय-नागरिक-प्रशासनेन सह उन्नत-प्रौद्योगिक्याः एकीकरणं कर्तुं "स्मार्ट-बॉर्डर-रणनीतिम्" अपि उद्घाटितवान्।

**विश्वपर्यावरणदिवसः**

अद्य विश्वपर्यावरणदिवसः समग्रे विश्वे आमान्यते । पृथिव्यां जीवनस्य संरक्षणाय पर्यावरण-जागरूकतायाश्च संवर्धनार्थं संयुक्त-राष्ट्रपर्यावरण-कार्यक्रमस्य अन्तर्गतं अयं दिवसः प्रतिवर्षं आयोज्यते । प्रशासनेन दिल्ल्यां अष्टादश नमो आक्सीजन पार्क इति उद्यानानि उद्घाटितानि । अस्मिन् अवसरे उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी, गृहमन्त्री अमित शाहः , रक्षामन्त्री राजनाथ सिंहः च देशवासिभ्यः शुभाशंसाः प्रदत्तवन्तः।

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् "मातुः नाम्ना एकः वृक्षः" इति अभियानं वनक्षेत्रवृद्धौ महत्त्वपूर्णं योगदानं दत्तवत्। तेन उक्तं यत् अयं दिवसः पर्यावरणसंरक्षणम् सततविकासम् च प्रति अस्माकं प्रतिबद्धतायाः प्रतीकः अस्ति। उपराष्ट्रपतिना उक्तं यत् भारतीयसंस्कृतिः मानवम् प्रकृत्या सह सामञ्जस्येन जीवनं यापयितुं शिक्षयति।

**मुरुगनः अभियानस्य**

सूचनाप्रसारणराज्यमन्त्री डॉ. एल.मुरुगनः अद्य नवदिल्लीनगरस्य आल इंडिया रेडियो परिसरे "एक पेड़ माँ के नाम" अभियानस्य भागरूपेण एकं वृक्षं रोपितवान्। आकाशवाण्या सह सम्भाषमाणः डॉ. मुरुगनः नागरिकेभ्यः आह्वानं कृतवान् यत् ते पर्यावरणस्य रक्षणस्य प्रतिज्ञां कुर्वन्तु। सः जलसंरक्षणस्य, वृक्षारोपणस्य, वृक्षाणां रक्षणस्य, संरक्षणस्य च आवश्यकतायाः उपरि बलं दत्तवान् ।

**भारतीय ऋतु विज्ञानविभाग**

भारतीय ऋतु विज्ञानविभागेन उक्तम् यत् आगामिनोः द्वि त्रि दिवसयोः मध्ये मध्य-अरबसागरस्य केषुचित् अधिकेषु भागेषु, समग्रे गोवाप्रदेशे, महाराष्ट्रस्य, आन्ध्रप्रदेशस्य, कर्नाटकस्य च केषुचित् भागेषु, तमिलनाडुराज्यस्य अवशिष्टेषु भागेषु तथा पूर्वोत्तरराज्यानां केषुचित् भागेषु दक्षिण-पश्चिम प्रावृटः आगमनाय परिस्थितयः अनुकूलाः सन्ति। अनेन विभागेन केरल , कर्णाटक, तमिलनाडु-पुदुच्चेरी चेत्येतेषु राज्येषु केषुचित् स्थानेषु अतिवृष्टेः सम्भावना अपि प्रकटिता।

**एशिया-कप् हॉकी**

पुरुषाणाम् आ-अष्टादश एशिया-कप् हॉकी-प्रतियोगितायाः उपान्त्यस्पर्धायां भारतेन-पाकिस्तान दलम् पञ्च त्रि अंक अंतरालेन पराजितम्। अपरतः महिलानाम् आ-अष्टादश एशिया-कप् प्रतियोगितायाः उपान्त्यस्पर्धायां चीनदेशेन भारतीयदलम् पराजितम्।

**।। इति वार्ताः ।।**